# कलियाचकविक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालयः

**केन्द्रीयसंस्कृतविश्वविद्यालयानुमोदितः**

**हेरिया, पूर्वमेदिनीपुरम्, पश्चिमवङ्गः -721430**

## वृक्षारोपणसमारोहः

## एक पेड़ मा के नाम, One Student One Tree

## सेवितव्यो महावृक्षः फलच्छायासमन्वितः

विश्वविद्यालय-अनुदान-आयोगस्य तथा केन्द्रीयसंस्कृतविश्वविद्यालयस्यादेशानुसारम् अस्मत्कलियाचकविक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालये वृक्षारोपणसमारोहकार्यक्रमः समनुष्ठितः। भारतवर्षस्य यशस्विनः प्रधानमन्त्रिणः श्रीनरेन्द्रमोदिमहोदयस्योद्घोषवाक्यानुरूपम् एक पेड़ मा के नाम **(एकः वृक्षः मातुर्नाम्ने)** तथा विश्वविद्यालय-अनुदान-आयोगस्य आदेशानुसारम् **एकः छात्रः एकः वृक्षः(One Student One Tree)** इत्याधारीकृत्य महाविद्यालयपरिवारपक्षतः सप्तत्यधिकमेकशतं(170) वृक्षाणां रोपणमभवत्। अत्र महाविद्यालयस्य प्राचार्याणां डॉ. देवीपदरथमहोदयानां निर्देशानुसारं तेषामाध्यक्षेण च सर्वेऽपि अध्यापकाः, कर्मचारिणः, छात्राः, ग्रामिणश्च कार्यक्रमेऽस्मिन् महता उत्साहेन भागमगृह्णन्। महाविद्यालयपरिसरे गुवाक-आम्र-श्वेतचन्दन-जम्बीर-पनस-नारिकेलादीनां विविधफलछायाप्रदायकवृक्षाणां समारोपणं सर्वैः कृतम्। किञ्च सर्वैः प्रतिज्ञा कृता यत् एतेषां वृक्षाणां परिरक्षणं तथा अन्यान्नपि वृक्षारोपणाय प्रवर्तनम् अस्माभिः करिष्यते इति।

प्राचार्यः

डॉ. देवीपदरथः

# वृक्षारोपणकार्यक्रमस्य कानिचन चित्राणि



























